# संस्कृत-वार्ता:

दिनाङ्क :- 28.05.2024

सायम् - 06:20

आदौ-मुख्यवार्ता:

- लोकसभानिर्वाचनस्य सप्तमान्तिमचरणाय च प्रचाराभियानं तीव्रतया प्रचलति। राजनीतिक-दलानां शीर्षनेतार: जनान् आकर्षितुं जनसभा: मार्ग-प्रदर्शनं च कुर्वन्ति।
- रेमल चक्रवातस्य प्रभावेण असमे मिजोरमे च प्रबल-वृष्टि: संजायते। चक्रवातेन् आइजोल नगरम् निकषा दुरापादिते भूस्खलने द्वादश जना: मृता:।
- भारतेन पापुआ न्यू गिनी राष्ट्रे साहाय्य-पुनर्वास-पुनर्निर्माण-प्रयासान् समर्थितुं एक-लक्षम् अमरीकी डॉलर मितस्य साहाय्य-राशे: घोषणा कृता।
- फ्रेंच-ओपन-□निस्-स्पर्धा-मालिकायाम् अद्य पेरिस्-नगरे पुरुष-युगल-वर्गस्य प्रथम-चक्रे शीर्ष-भारतीय-क्रीडकौ रोहनबोपन्ना यूकी-भाम्बरी-च अभियानस्य आरम्भं करिष्यत:।

## अथ वार्ता: विस्तरेण

### लोकसभा-निर्वाचन

लोकसभानिर्वाचनस्य सप्तमान्तिमचरणाय च प्रचाराभियानं तीव्रतया प्रचलति। राजनीतिक-दलानां शीर्षनेतार: जनसभा: मार्ग-प्रदर्शनं च कुर्वन्ति। अस्मिन् चरणे जूनमासस्य प्रथमे दिनाङ्के अष्ट-राज्यानां सप्तपञ्चाशत् लोक-सभासनेभ्य: मतदानं भविष्यति। मतगणना तदनु जूनमासे चतुर्थे दिवसे भविष्यति। प्रधानमन्त्री नरेन्द्र-मोदी अवदत् यत् जून मासस्य चतुर्थ दिवसानन्तरं भ्रष्टजनान् विरुध्य कठोर-कार्याचरणं विधास्यते। झारखण्डस्य दुमका-विमान-पत्तन-प्राङ्गणे एकां जनसभां सम्बोधयन् प्रधानमन्त्री अवदत् यत् झारखण्ड-मुक्ति-मोर्चा-दलेन, कांग्रेस-दलेन च झारखण्डं लुण्ठितम्। भ्रष्ट- मन्त्रिणाम् संसत्सदस्यानाम् अधिकारिणाम् च स्थलेषु अन्वीक्षणे बृहन्मात्रायां धनं प्राप्तम्। पश्चिम बंगालस्य बारासात बसिरहाट च लोकसभासनयोः प्रत्याशिनयोः समर्थने अद्य उत्तर चतुर्विंशतिः परगना जनपदे भाजपेति दलस्य वरिष्ठनेता प्रधानमंत्री नरेन्द्र मोदी एकां जनसभां संबोधितवान्। अस्मिन् अवसरे श्री मोदी अवदत् यत् तस्य शासनकाले भ्रष्टाचारस्य प्रति शून्यसहिष्णुता वर्तते। प्रधानमन्त्री उक्तवान् यत् काङ्ग्रेसदलं विपक्षिणां इण्डि संयुतिः च सामान्यजनानाम् विषये न चिन्तयति, ते केवलम् आत्मनः चिन्तामेव कुर्वन्ति। सः अवदत् यत् पश्चिमबङ्गालस्य मतुआ समुदायस्य जनेभ्यः सीएए-इत्यन्तर्गतं नागरिकता दीयते। सममेव उक्तं यत् तदीय-प्रशासने महिलाः सशक्ताः भवन्ति इति। अपरत्र बिहारस्य मुख्यमंत्री नितीश-कुमार: नालन्दा-लोकसभासनस्य अष्टवन क्षेत्रे जनसभां सम्बोधयन् लालू-प्रसाद-यादवम् आलोचयत्। आर.जे.डी. प्रमुख: लालू-यादव: अवोचत् यत् ऐषम: निर्वाचनम् आरक्षणं संविधानं च संरक्षितुं वर्तते। अन्यत्र उत्तरप्रदेश-मुख्यमन्त्री योगी-आदित्यनाथ: गोरखपुरस्य प्रत्याशिन: रविकिशनस्य पक्षे प्रचारम् अकरोत्।

### प्रधानमन्त्री-साक्षात्कार:

प्रधानमन्त्री अथ च भारतीय-जनता-पार्टीति दलस्य वरिष्ठ-नेता नरेन्द्र-मोदी कांग्रेस-दलम् अधिक्षिपत् यत् तत् दलम् आरक्षणस्य नाम्नि मत-प्राप्तये राजनीतिं करोति। एकस्मिन् वार्ता-अभिकरणेन सह स्वीय-साक्षात्कारे श्रीमोदी उक्तवान् यत् विपक्षिण: मत-प्राप्तये राजनीतिं विधाय भारतीय- संविधानस्य मूल-भावनायाः उल्लङ्घनं दधते। अमुना प्रोक्तं यत् विपक्षिणः अनुसूचित-जातिभ्यः अनुसूचित-जनजातिभ्य: पश्च-वर्तिभ्यः च छलं कुर्वन्ति। श्री-मोदी अवदत् यत् सः एतेषां समुदाय-जनानाम् अधिकाराणां रक्षायै योत्स्यति। अपि च प्रवर्तन-निदेशालयस्य केन्द्रीयान्वीक्षणाभिकरणस्य आयकर-विभागस्य च प्रयोग-विषयक-विपक्षिणाम् आरोपस्य निराकरणं विदधता प्रधानमन्त्री अवोचत् यत् तदीयं प्रशासनं भ्रष्टाचार-निराकर्तुं कार्याचरणे विश्वसिति। लोकसभायां जम्मू-कश्मीरे प्रबल-मतदान-विषये श्री मोदी अवोचत् यत् तस्मै सन्तोषप्रद: अयम् वर्तते। कश्मीरवासिन: उत्साह-पूर्वकं मतदाने प्रतिभागम् अकुर्वन्। आत्मनिर्भर-लक्ष्यान्तर्गतं स्वदैशिक-प्रतिभासंवर्धनं वृत्यवसर-क्षमतानां च संवर्धनमिति प्रशासनस्य उद्देश्यं वर्तते।

## भारतर्तु-विज्ञानम्-सम्भावना

चक्रवातस्य रेमल इत्यस्य प्रभावेण पश्चिम बङ्गाले दुरापादित-घटनासु षड्-जना: मृत्युमुपगता:। तत्र झञ्झावातेन प्रबल-वृष्ट्या च जनजीवनं पर्याकुलितं विद्यते। सामुद्रिकं जलं कृषिक्षेत्रे मत्स्य-पलन-क्षेत्रे च समागतम्। अत्रान्तरे जना: प्रशासनिक-साहाय्य-केन्द्रेभ्य: गृहं प्रति प्रस्थीयन्ते। अपरत्र मिजोरम-राज्ये अद्य प्रातः दुरापन्ने भूस्खलने द्वादश जनाः मृत्युमुपगताः। इदं भूस्खलनं राजधान्याः आइजोल-नगरात् चतुर्किलोमीटर-दूरस्थे ह्लिमे-क्षेत्रे दुरापन्नम्। तत्र साहाय्योद्धार-कार्यं सजवं विधीयते। अवधेयं यत् रेमल-चक्रवातेन गतरात्रौ प्रबलवृष्टिः झञ्झावातश्च समागतौ। अपि च असम-राज्ये रेमल चक्रवात-कारेण विविध-जनपदेषु प्रबल-संचेतना प्रसारिता। प्रभावित जनपदेषु विद्युत्सेवा गत निशीथात् स्थगिता अस्ति। तत्र विद्यालया: अपि दिन द्वयं यावत् विहिता: सन्ति। पूर्वोत्तर-क्षेत्रस्य रेलसेवा अपि अनेन चक्रवातेन दुष्प्रभाविता वर्तते।

## पापुआ न्यू गिनी साहाय्यम्

विनाशकारं भूस्खलनं निध्याय भारतेन पापुआ न्यू गिनी राष्ट्रे साहाय्य-पुनर्वास-पुनर्निर्माण-प्रयासान् समर्थितुं एक-लक्षम् अमरीकी डॉलर मितस्य साहाय्य-राशेः घोषणा कृता। पापुआ न्यू गिनी इत्यत्र एंगा प्रान्ते अस्य मासस्य चतुर्विंशे दिने एकं विनाशकारं भू-स्खलनं जातम्। अस्मिन् भू-स्खलने शतशो जनाः आपीडिताः तत्र जनधन-हानिश्च सञ्जाता। विदेशमन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत् प्राकृतिक-आपत् कारणेन समुत्पन्ने काठिन्य-समये भारतं पापुआ न्यू गिनी देशेन सह विद्यते। मन्त्रालयेनोक्तं यत् आपत्-हानेः न्यूनीकरणं प्रबन्धनं च भारतस्य हिन्द-प्रशान्त-महासागर-नीते: आई.पी.ओ.आई. इत्यस्या: एकः मुख्य-स्तम्भः वर्तते। अस्य घोषणा नवदशोत्तर-द्विससहस्र-तमे वर्षे नवम्बर-मासे प्रधानमन्त्रिणा नरेन्द्र-मोदिना कृतासीत्। भारतं मानवीय-साहाय्यं प्रति आपदोद्धारं प्रति च वचनबद्धम् अस्ति।

## राष्ट्रियान्वीक्षणाभिकरणम्

(एन.आई.ए) इति राष्ट्रियान्वीक्षणाभिकरणेन मानव-तस्करणेन अन्तर्जालापराधेन च सम्बद्धं गुल्मं विरुध्य अभियाने पञ्च-जनाः निगडिताः। राज्यारक्षि-बलानां संयुक्त-कार्याचरणे षड्-राज्येषु केन्द्र-शासित-प्रदेशेषु च पञ्चदश स्थलेषु अन्वीक्षणं कृतम्। एते आरोपिणः वडोदरा-गोपालगञ्ज-दक्षिण-पश्चिम दिल्ली-गुरुग्राम-चण्डीगढ़-नगरेभ्यः निगडिताः। एते सर्वे तस्मै गुल्माय कार्यं कुर्वन्ति स्म यः भारतीय-युवभ्यः आजीविकायाः वृथा-आश्वासनं प्रदाय विदेशेषु नयति स्म। विदेशं च उपेत्य एतान् यूनः लाओस कम्बोडिया-प्रभृति स्थलेषु अवैध-गतिविधिषु कार्यं कर्तुं वदति स्म। संयुक्त-कार्याचरणे आङ्किकोपकरणानि पारगमन-पत्राणि छद्म-प्र-पत्राणि आपत्तिजनक-सामग्री च जडीकृताः। अस्मिन् प्रकरणे विविध-राज्येषु अष्ट प्राथमिक्यः पञ्जीकृताः। अस्य मासस्य आरम्भे राष्ट्रियान्वीक्षणाभिकरणेन अन्वीक्षणे ज्ञातं यत् अस्य गुल्मस्य व्यापकान्ताराष्ट्रिय-सम्बन्धाः सन्ति। अस्मिन् प्रकरणे इतोपि अन्वीक्षणं विधीयते।

**<u>फ्रैंच ओपन्</u>**

फ्रेंच-ओपन-टेनिस्-स्पर्धा-मालिकायाम् अद्य पेरिस्-नगरे पुरुष-युगल-वर्गस्य प्रथम-चक्रे शीर्ष-भारतीय-क्रीडकौ रोहनबोपन्ना यूकी-भाम्बरी-च अभियानस्य आरम्भं करिष्यतः। उभयो: युगलं पृथक्-पृथक् योत्स्यति। पुरुषाणाम् एकल-वर्गस्य प्रथम-चक्रे क्रीडकस्य रफेल-नडाल् इत्यस्य प्रतियोगितायां पुनरागमनं ह्यः निराशाजनकरूपेण समाप्तम्। यतोहि सः अलेक्जेंडर ज्वेरेव् इत्यनेन पराजितः।

**।। इति वार्ता:।।**